श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीब्रह्मवैवर्तपुराणे श्रीमन्नारायण प्रोक्तः

# ॥ श्री महालक्ष्मीस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री महालक्ष्मीस्तवः ॥

श्रीनारायण उवाच
देवि त्वां स्तोतुमिच्छामि न क्षमाः स्तोतुमीश्वराः।
बुद्धेरगोचरां सूक्ष्मां तेजोरूपां सनातनीम्।
अत्यनिर्वचनीयां च को वा निर्वक्तुमीश्वरः॥ 1 ॥

स्वेच्छामयीं निराकारां भक्ताऽनुग्रहविग्रहाम्।
स्तौमि वाङ्मनसो पारां किंवाऽहं जगदम्बिके॥ 2 ॥

परां चतुर्णां वेदानां पारबीजं भवार्णवे।
सर्वसस्याऽधिदेवीं च सर्वासामपि सम्पदाम्॥ 3 ॥

योगीनां चैव योगानां ज्ञानानां ज्ञानिनां तथा।
वेदानां वै वेदविदां जननीं वर्णयामि किम्॥ 4 ॥

यया विना जगत्सर्वमबीजं निष्फलं ध्रुवम्।
यथा स्तनन्धयानां च विना मात्रा सुखं भवेत्॥ 5 ॥

प्रसीद जगतां माता रक्षास्माननतिकातरान्।
वयं त्वच्चरणाम्भोजे प्रपन्नाः शरणं गताः॥ 6 ॥

नमः शक्तिस्वरूपायै जगन्मात्रे नमो नमः।
ज्ञानदायै बुद्धिदायै सर्वदायै नमो नमः॥ 7 ॥

हरिभक्तिप्रदायिन्यै मुक्तिदायै नमो नमः।
सर्वज्ञायै सर्वदायै महालक्ष्म्यै नमो नमः॥ 8 ॥

कुपुत्राः कुत्रचित्सन्ति न कुत्राऽपि कुमातरः।
कुत्र माता पुत्रदोषं तं विहाय च गच्छति॥ **9** ॥

स्तनन्धयेभ्य इव मे हे मातर्देहि दर्शनम्।
कृपां कुरु कृपासिन्धो त्वमस्मान्भक्तवत्सले॥ **10** ॥

इत्येवं कथितं वत्स पद्मायाश्च शुभावहम्।
सुखदं मोक्षदं सारं शुभदं संपदः प्रदम्॥ **11** ॥

इदं स्तोत्रं महापुण्यं पूजाकाले च यः पठेत्।
महालक्ष्मीर्गृहं तस्य न जहाति कदाचन॥ **12** ॥

॥ श्री महालक्ष्मीस्तवः समाप्तः ॥